॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

पञ्चमकाण्डे चतुर्थः प्रश्नः

इष्टकात्रयाभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

देवासुराः सय्ँयत्ता आसन् ते न व्यजयन्त स एता इन्द्रस्तनूरपश्यत् ता उपाधत्त ताभिर् वै
स तनुवमिन्द्रियव्ँवीर्यमात्मन्नधत्त ततो देवा अभवन् पराऽसुरा यदिन्द्रतनूरुपदधाति तनुवमेव
ताभिरिन्द्रियव्ँवीर्यय्ँयजमान आत्मन् धत्तेऽथो सेन्द्रमेवाग्निꣳ सतनुञ्चिनुते भवत्यात्मना पराऽस्य
भ्रातृव्यो ॥ [१] ॥ भवति यज्ञो देवेभ्योऽपाक्रामत् तमवरुधन्नाशक्नुवन् त एता यज्ञतनूरपश्यन्
ता उपादधत ताभिर् वै ते यज्ञमवारुन्धत यद्यज्ञतनूरुपदधाति यज्ञमेव ताभिर् यजमानोऽव रुन्धे
त्रयस्त्रिꣳशतमुप दधाति त्रयस्त्रिꣳशद्वै देवता देवता एवाव रुन्धेऽथो सात्मानमेवाग्निꣳ सतनुञ्चि-
नुते सात्माऽमुष्मिँल्लोके ॥ [२] ॥ भवति य एवव्ँवेद ज्योतिष्मतीरुप दधाति ज्योतिरेवास्मिन्
दधात्येताभिर् वा अग्निश्चितो ज्वलति ताभिरेवैनꣳ समिन्ध उभयोरस्मै लोकयोर् ज्योतिर् भवति
नक्षत्रेष्टका उप दधात्येतानि वै दिवो ज्योतीꣳषि तान्येवाव रुन्धे सुकृताव्ँवा एतानि ज्योतीꣳषि
यन्नक्षत्राणि तान्येवाऽऽप्नोत्यथो अनूकाशमेवैतानि ॥ [३] ॥ ज्योतीꣳषि कुरुते सुवर्गस्य
लोकस्यानुख्यात्यै यथ् सꣳस्पृष्टा उपदद्ध्याद्वृष्ट्यै लोकमपि दद्ध्यादवर्षुकः पर्जन्यः स्यादसꣳ-
स्पृष्टा उप दधाति वृष्ट्या एव लोकङ्करोति वर्षुकः पर्जन्यो भवति पुरस्तादन्याः प्रतीचीरुप दधाति
पश्चादन्याः प्राचीस्तस्मात् प्राचीनानि च प्रतीचीनानि च नक्षत्राण्या वर्तन्ते ॥ [४] ॥

(भ्रातृव्योलोकेवैतान्येकचत्वारिꣳशच्च) ॥ १ ॥

ऋतव्या उप दधात्यृतूनाङ्कॢप्त्यै द्वन्द्वमुप दधाति तस्माद् द्वन्द्वमृतवोऽधृतेव वा एषा यन्मद्ध्यमा चितिरन्तरिक्षमिव वा एषा द्वन्द्वमन्यासु चितीषूप दधाति चतस्रो मद्ध्ये धृत्या अन्तःश्लेषणँव्वा एताश्चितीनाय्यँदृतव्या यदृतव्या उपदधाति चितीनाव्विँधृत्या अवकामनूप दधात्येषा वा अग्नेर् योनिः सयोनि ॥ [५] ॥ मेवाग्निञ्चिनुत उवाच ह विश्वामित्रोऽददित् स ब्रह्मणाऽन्नय्यँस्यैता उपधीयान्तै य उ चैना एवव्वँददिति सव्वँथ्सरो वा एतम्प्रतिष्ठायै नुदते योऽग्निञ्चित्वा न प्रतितिष्ठति पञ्च पूर्वाश्चितयो भवन्त्यथ षष्ठीञ्चितिञ्चिनुते षड् वा ऋतवः सव्वँथ्सर ऋतुष्वेव सव्वँथ्सरे प्रति तिष्ठत्येता वा ॥ [६] ॥ अधिपत्नीर् नामेष्टका यस्यैता उपधीयन्तेऽधिपतिरेव समानानाम्भवति यन्द्विष्यात् तमुपदधद् ध्यायेदेताभ्य एवैनन्देवताभ्य आ वृश्चति ताजगार्तिमार्च्छत्यङ्गिरसः सुवर्गँल्लोकय्यँन्तो या यज्ञस्य निष्कृतिरासीत् तामृषिभ्यः प्रत्यौहन् तद्धिरण्यमभवद्यद्धिरण्यशल्कैः प्रोक्षति यज्ञस्य निष्कृत्या अथो भेषजमेवास्मै करोत्य ॥ [७] ॥ थो रूपेणैवैनꣳ समर्द्धयत्यथो हिरण्यज्योतिषैव सुवर्गँल्लोकमेति साहस्रवता प्रोक्षति साहस्रः प्रजापतिः प्रजापतेराप्त्या इमा मे अग्न इष्टका धेनवः सन्त्वित्याह धेनूरेवैनाः कुरुते ता एनङ्कामदुघा अमुत्रामुष्मिँल्लोक उप तिष्ठन्ते ॥ [८] ॥

(सयोनि मेता वै करोत्ये कान्नचत्वारिꣳशच्च) ॥ २ ॥

रुद्रो वा एष यदग्निः स एतर्हि जातो यर्हि सर्वश्चितः स यथा वथ्सो जातः स्तनम्प्रेप्सत्येवव्वाँ एष एतर्हि भागधेयम्प्रेप्सति तस्मै यदाहुतिन्न जुहुयादद्ध्वर्युञ्च यजमानञ्च ध्यायेच्छतरुद्रीयञ्जुहोति भागधेयेनैवैनꣳ शमयति नाऽऽ*र्तिमार्च्छत्यद्ध्वर्युर् न यजमानो यद् ग्राम्याणाम्पशूनां ॥ [९] ॥ पयसा जुहुयाद् ग्राम्यान् पशूञ्छुचाऽर्पयेद्यदारण्यानामारण्यान् जर्तिलयवाग्वा वा जुहुयाद् गवीधुकयवाग्वा वा न ग्राम्यान् पशून्हिनस्ति नाऽऽरण्यानथो खल्वाहुरनाहुतिर् वै जर्तिलाश्च गवीधुकाश्चेत्यजक्षीरेण जुहोत्याग्नेयी वा एषा यदजाऽऽहुत्यैव जुहोति न ग्राम्यान् पशून्हिनस्ति नाऽऽरण्यानङ्गिरसः सुवर्गँल्लोकय्यँन्तो ॥ [१०] ॥ ऽजायाङ्घर्मम्प्रासिञ्चन्थ् सा शोचन्ती पर्णम्पराऽजिहीत सो(१)ऽर्कोऽभवत् तदर्कस्याऽर्कत्व मर्कपर्णेन जुहोति सयोनित्वायोदङ् तिष्ठन् जुहोत्येषा वै रुद्रस्य दिख् स्वायामेव दिशि रुद्रन्निरवदयते चरमाया-

मिष्टकायाञ्जुहोत्यन्तत एव रुद्रन्निरवदयते त्रेधाविभक्तञ्जुहोति त्रय इमे लोका इमानेव लोकान्थ्
समावद्वीर्यान् करोतीयत्यग्रे जुहोत्य ॥ [११] ॥ थेयत्यथेयति त्रय इमे लोका एभ्य एवैनँल्लो-
केभ्यः शमयति तिस्र उत्तरा आहुतीर् जुहोति षट् थ्सम्पद्यन्ते षड् वा ऋतव ऋतुभिरेवैनꣳ
शमयति यदनुपरिक्रामञ्जुहुयादन्तरवचारिणꣳ रुद्रङ्कुर्यादथो खल्वाहुः कस्याँव्वाऽह दिशि रुद्रः
कस्याँव्वेत्यनुपरिक्राममेव होतव्य मपरिवर्गमेवैनꣳ शमयत्ये ॥ [१२] ॥ ता वै देवताः सुवर्ग्या
या उत्तमास्ता यजमानँव्वाचयति ताभिरेवैनꣳ सुवर्गँल्लोकङ्गमयति यन्द्विष्यात् तस्य सञ्चरे पशू-
नान्न्यस्येद् यः प्रथमः पशुरभितिष्ठति स आर्तिमार्च्छति ॥ [१३] ॥

(पशूनां यन्तो ऽग्ने जुहोत्य परिवर्गमेवैनꣳ शमयति त्रिꣳशच्च) ॥ ३ ॥

अश्मन्नूर्जमिति परि षिञ्चति मार्जयत्येवैनमथो तर्पयत्येव स एनन्तृप्तोऽक्षुध्यन्नशोच न्नमु-
ष्मिँल्लोक उप तिष्ठते तृप्यति प्रजया पशुभिर् य एवँव्वेद तान्न इषमूर्जन्धत्त मरुतः सꣳर-
राणा इत्याहान्नँव्वा ऊर्गन्नम्मरुतोऽन्नमेवाव रुन्धेऽश्मꣳस्ते क्षुदमुन्ते शु ॥ [१४] ॥ गृच्छतु
यन्द्विष्म इत्याह यमेव द्वेष्टि तमस्य क्षुधा च शुचा चार्पयति त्रिः परिषिञ्चन् पर्येति त्रिवृद्वा अग्निर्
यावानेवाग्निस्तस्य शुचꣳ शमयति त्रिः पुनः पर्येति षट् थ्सम्पद्यन्ते षड् वा ऋतव ऋतुभिरेवास्य
शुचꣳ शमयत्यपाँव्वा एतत् पुष्पँय्यद्वेतसोऽपाꣳ ॥ [१५] ॥ शरोऽवका वेतसशाखया चाव-
काभिश्च वि कर्षत्यापो वै शान्ताः शान्ताभिरेवास्य शुचꣳ शमयति यो वा अग्निञ्चितम्प्रथमः
पशुरधिक्रामती श्वरो वै तꣳ शुचा प्रदहो मण्डूकेन वि कर्षत्येष वै पशूनामनुपजीवनीयो न
वा एष ग्राम्येषु पशुषु हितो नाऽऽ*रण्येषु तमेव शुचाऽर्पयत्यष्टाभिर् वि कर्षत्य ॥ [१६] ॥
ष्टाक्षरा गायत्री गायत्रोऽग्निर् यावानेवाऽग्नि स्तस्य शुचꣳ शमयति पावकवतीभिरन्नँव्वै पाव-
कोऽन्नेनैवास्य शुचꣳ शमयति मृत्युर् वा एष यदग्निर् ब्रह्मण एतद्रूपँय्यत् कृष्णाजिनङ्कार्ष्णी
उपानहावुप मुञ्चते ब्रह्मणैव मृत्योरन्तर् धत्तेऽन्तर् मृत्योर् धत्तेऽन्तरन्नाद्या दित्याहुरन्या मुप-
मुञ्चतेऽन्यान्नान्त ॥ [१७] ॥ रेव मृत्योर् धत्तेऽवान्नाद्यꣳ रुन्धे नमस्ते हरसे शोचिष इत्याह
नमस्कृत्य हि वसीयाꣳसमुपचरन्त्यन्यन्ते अस्मत् तपन्तु हेतय इत्याह यमेव द्वेष्टि तमस्य

शुचाऽर्पयति पावको अस्मभ्यꣳ शिवो भवेत्याहान्नव्वै पावकोऽन्नमेवाव रुन्धे द्वाभ्यामधि क्रामति प्रतिष्ठित्या अपस्यवतीभ्याꣳ शान्त्यै ॥ [१८] ॥

(शु ग्वेतसोऽपा मष्टाभिर् वि कर्षति नान्त रेकान्नपञ्चाशच्च) ॥ ४ ॥

नृषदे वडिति व्याघारयति पङ्क्त्याऽऽहुत्या यज्ञमुखमा रभतेऽक्ष्णया व्याघारयति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै यद्वषट्कुर्याद्यातयामाऽस्य वषट्कारः स्याद्यन्न वषट्कुर्याद्रक्षाꣳसि यज्ञꣳ हन्युर् वडित्याह परोक्षमेव वषट् करोति नास्य यातयामा वषट्कारो भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति हुतादो वा अन्ये देवा ॥ [१९] ॥ अहुतादोऽन्ये तानग्निचिदेवोभयान् प्रीणाति ये देवा देवानामिति दध्ना मधुमिश्रेणावोक्षति हुतादश्चैव देवानहुतादश्च यजमानः प्रीणाति ते यजमानम्प्रीणन्ति दध्नैव हुतादः प्रीणाति मधुषाऽहुतादो ग्राम्यव्वा एतदन्नय्यँद्दध्यारण्यम्मधु यद्दध्ना मधुमिश्रेणावोक्षत्युभयस्यावरुद्ध्यै ग्रमुष्टिनाऽवोक्षति प्राजापत्यो ॥ [२०] ॥ वै ग्रमुष्टिः सयोनित्वाय द्वाभ्याम्प्रतिष्ठित्या अनुपरिचारमवोक्षत्यपरिवर्गमेवैनान् प्रीणाति वि वा एष प्राणैः प्रजया पशुभिरृद्ध्यते योऽग्निञ्चिन्वन्नधिक्रामति प्राणदा अपानदा इत्याह प्राणानेवाऽऽत्मन् धत्ते वर्चोदा वरिवोदा इत्याह प्रजा वै वर्चः पशवो वरिवः प्रजामेव पशूनात्मन् धत्त इन्द्रो वृत्रमहन् तव्वृँत्रो ॥ [२१] ॥ हतः षोडशभिर् भोगैरसिनात्स एतामग्नयेऽनीकवत आहुतिमपश्यत् तामजुहोत् तस्याग्निरनीकवान्थ् स्वेन भागधेयेन प्रीतः षोडशधा वृत्रस्य भोगानप्यदहद्वैश्वकर्मणेन पाप्मनो निरमुच्यत यदग्नये ऽनीकवत आहुतिञ्जुहोत्यग्निरेवा स्यानीकवान्थ् स्वेन भागधेयेन प्रीतः पाप्मानमपि दहति वैश्वकर्मणेन पाप्मनो निर् मुच्यते यङ्कामयेत चिरम्पाप्मनो ॥ [२२] ॥ निर् मुच्येतेत्येकैकन्तस्य जुहुयाच्चिरमेव पाप्मनो निर् मुच्यते यङ्कामयेत ताजक् पाप्मनो निर् मुच्येतेति सर्वाणि तस्यानुद्रुत्य जुहुयात् ताजगेव पाप्मनो निर् मुच्यतेऽथो खलु नानैव सूक्ताभ्याञ्जुहोति नानैव सूक्तयोर् वीर्यन्दधात्यथो प्रतिष्ठित्यै ॥ [२३] ॥

(देवाः प्राजापत्यो वृत्र श्चिरम्पाप्मन श्चत्वारिꣳशच्च) ॥ ५ ॥

उदेनमुत्तरान्नयेति समिध आ दधाति यथा जनँय्यतेऽवसङ्करोति तादृगेव तत् तिस्र आ दधाति त्रिवृद्वा अग्निर् यावानेवाग्नि स्तस्मै भागधेयङ्करोत्यौदुंबरीर् भवन्त्यूर्ग् वा उदुंबर ऊर्ज-मेवास्मा अपि दधात्युदु त्वा विश्वे देवा इत्याह प्राणा वै विश्वे देवाः प्राणै ॥ [२४] ॥ रेवै-नमुद्यच्छतेऽग्ने भरन्तु चित्तिभिरित्याह यस्मा एवैनञ्चित्तायोद्यच्छते तेनैवैनꣳ समर्द्धयति पञ्च दिशो दैवीर् यज्ञमवन्तु देवीरित्याह दिशो ह्येषोऽनु प्रच्यवतेऽपामतिन्दुर्मतिम्बाधमाना इत्याह रक्षसामपहत्यै रायस्पोषे यज्ञपतिमाभजन्तीरित्याह पशवो वै रायस्पोषः ॥ [२५] ॥ पशू-नेवाव रुन्धे षड्भिर्हरति षड् वा ऋतव ऋतुभिरेवैनꣳ हरति द्वे परिगृह्यवती भवतो रक्षसाम-पहत्यै सूर्यरश्मिर्हरिकेशः पुरस्तादित्याह प्रसूत्यै ततः पावका आशिषो नो जुषन्तामित्या-हान्नँव्वै पावकोऽन्नमेवाव रुन्धे देवासुराः सँय्यत्ता आसन् ते देवा एतदप्रतिरथमपश्यन् तेन वै तेऽप्रत्य ॥ [२६] ॥ सुरानजयन् तदप्रतिरथस्याप्रतिरथत्वँय्यदप्रतिरथन्द्वितीयो होताऽन्वा-हाप्रत्येव तेन यजमानो भ्रातृव्यान् जयत्यथो अनभिजितमेवाभि जयति दशर्चम्भवति दशा-क्षरा विराड् विराजेमौ लोकौ विधृतावनयोर् लोकयोर्विधृत्या अथो दशाक्षरा विराडन्नँव्विराड् विराज्येवान्नाद्ये प्रति तिष्ठत्यसदिव वा अन्तरिक्षमन्तरिक्षमिवाऽऽग्नीध्रमाग्नीद्ध्रे ॥ [२७] ॥ ऽश्मानन्नि दधाति सत्त्वाय द्वाभ्याम्प्रतिष्ठित्यै विमान एष दिवो मद्ध्य आस्त इत्याह व्येवैतया मिमीते मद्ध्ये दिवो निहितः पृश्निरश्मेत्याहान्नँव्वै पृश्न्यन्नमेवाव रुन्धे चतसृभिरा पुच्छादेति चत्वारि छन्दाꣳसि छन्दोभिरेवेन्द्रव्विश्वा अवीवृधन्नित्याह वृद्धिमेवोपावर्तते वाजानाꣳ सत्पति-म्पति ॥ [२८] ॥ मित्याहान्नँव्वै वाजोऽन्नमेवाव रुन्धे सुम्नहूर् यज्ञो देवाꣳ आ च वक्षदित्याह प्रजा वै पशवः सुम्नम्प्रजामेव पशूनात्मन् धत्ते यक्षदग्निर् देवो देवाꣳ आ च वक्षदित्याह स्वगाकृत्यै वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीदित्याहासौ वा आदित्य उद्यन्नुद्ग्राभ एष निम्रोचन् निग्राभो ब्रह्मणैवाऽऽत्मानमुद्गृह्णाति ब्रह्मणाभ्रातृव्यन्नि गृह्णाति ॥ [२९] ॥

(प्राणैः पोषोऽप्रत्या ग्नीद्ध्रे पति मेष दश च) ॥ ६ ॥

प्राचीमनु प्रदिशम्प्रेहि विद्वानित्याह देवलोकमेवैतयोपावर्तते क्रमद्ध्वमग्निना नाकमित्याहे-मानेवैतया लोकान् क्रमते पृथिव्या अहमुदन्तरिक्षमाऽरुहमित्याहेमानेवैतया लोकान्थ् समा-

रोहति सुवर् यन्तो नापेक्षन्त इत्याह सुवर्गमेवैतया लोकमेत्यग्ने प्रेहि ॥ [३०] ॥ प्रथमो देवयतामित्याहोभयेष्वेवैतया देवमनुष्येषु चक्षुर् दधाति पञ्चभिरधि क्रामति पाङ्क्तो यज्ञो यावानेव यज्ञ स्तेन सह सुवर्गँल्लोकमेति नक्तोषासेति पुरोनुवाक्यामन्वाह प्रत्या अग्ने सहस्राक्षेत्याह साहस्रः प्रजापतिः प्रजापतेराप्त्यै तस्मै ते विधेम वाजाय स्वाहेत्याहान्नँवै वाजोऽन्नमेवाव ॥ [३१] ॥ रुन्धे दध्नः पूर्णामौदुंबरीꣳ स्वयमातृण्णायाञ्जुहोत्यूर्ग् वै दध्यूर्गुदुंबरोऽसौ स्वयमातृण्णाऽमुष्यामेवोर्जन्दधाति तस्मादमुतोऽर्वाचीमूर्जमुप जीवाम स्तिसृभिः सादयति त्रिवृद् वा अग्निर् यावानेवाग्नि स्तम्प्रतिष्ठाङ्गमयति प्रेद्धो अग्ने दीदिहि पुरो न इत्यौदुंबरीमा दधात्येषा वै सूर्मी कर्णकावत्येतया ह स्म ॥ [३२] ॥ वै देवा असुराणाꣳ शततर्हाꣳ स्तृꣳहन्ति यदेतया समिधमादधाति वज्रमेवैतच्छतघ्नीँय्यजमानो भ्रातृव्याय प्र हरति स्तृत्या अछंबट्कारव्ँविधेम ते परमे जन्मन्नग्न इति वैकङ्कतीमा दधाति भा एवाव रुन्धे ताꣳ सवितुर् वरेण्यस्य चित्रामिति शमीमयीꣳ शान्त्या अग्निर् वा ह वा अग्निचितन्दुहेऽग्निचिद् वाऽग्निन्दुहे ता ॥ [३३] ॥ सवितुर् वरेण्यस्य चित्रामित्याहैष वा अग्नेर् दोह स्तमस्य कण्व एव श्रायसोऽवेत् तेन ह स्मैनꣳ स दुहे यदेतया समिधमादधात्यग्निचिदेव तदग्निन्दुहे सप्त ते अग्ने समिधः सप्त जिह्वा इत्याह सप्तैवास्य साप्तानि प्रीणाति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः प्रजापते ॥ [३४] ॥ राप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजानाꣳ सृष्ट्या अग्निर्देवेभ्यो निलायत स दिशोऽनु प्राविशज्जुह्वन्मनसा दिशो ध्यायेद्दिग्भ्य एवैनमव रुन्धे दध्ना पुरस्ता ज्जुहोत्याज्येनोपरिष्टात् तेजश्चैवास्मा इन्द्रियञ्च समीची दधाति द्वादशकपालो वैश्वानरो भवति द्वादश मासाः सँव्वथ्सरः सँव्वथ्सरोऽग्निर् वैश्वानरः साक्षा ॥ [३५] ॥ देव वैश्वानरमव रुन्धे यत् प्रयाजानूयाजान् कुर्याद्विकस्तिः सा यज्ञस्य दर्विहोमङ्करोति यज्ञस्य प्रतिष्ठित्यै राष्ट्रँवै वैश्वानरो विण् मरुतो वैश्वानरꣳ हुत्वा मारुतान् जुहोति राष्ट्र एव विशमनु बध्नात्युच्चैर् वैश्वानरस्याऽऽश्रावयत्युपाꣳशु मारुतान् जुहोति तस्माद्राष्ट्रँविशमति वदति मारुता भवन्ति मरुतो वै देवानाव्ँविशो देवविशेनैवास्मै मनुष्यविश मव रुन्धे सप्त भवन्ति सप्तगणा वै मरुतो गणश एव विशमव रुन्धे गणेन गणमनुद्रुत्य जुहोति विशमेवास्मा अनुवर्त्मानङ्करोति ॥ [३६] ॥

(अग्ने प्रेद्ध वै स्म दुहे तां प्रजापतेः साक्षान् मनुष्यविश मेकविꣳशतिश्च) ॥ ७ ॥

वसोर् धाराञ्जुहोति वसोर् मे धाराऽसदिति वा एषा हूयते घृतस्य वा एनमेषा धाराऽमुष्मिंल्लोके पिन्वमानोप तिष्ठत आज्येन जुहोति तेजो वा आज्यन्तेजो वसोर् धारा तेजसैवास्मै तेजोऽव रुन्धेऽथो कामा वै वसोर् धारा कामानेवाव रुन्धे यङ्कामयेत प्राणानस्यान्नाद्यव्वि ॥ [३७] ॥ च्छिन्द्यामिति विग्राहन्तस्य जुहुयात् प्राणानेवास्यान्नाद्यव्वि च्छिनत्ति यङ्कामयेत प्राणानस्यान्नाद्यꣳ सन्तनुयामिति सन्ततान्तस्य जुहुयात् प्राणानेवास्यान्नाद्यꣳ सन्तनोति द्वादश द्वादशानि जुहोति द्वादश मासाः सँव्वथ्सरः सँव्वथ्सरेणैवास्मा अन्नमव रुन्धेऽन्नञ्च मेऽक्षुच्च म इत्याहैतद् वा ॥ [३८] ॥ अन्नस्य रूपꣳ रूपेणैवान्नमव रुन्धेऽग्निश्च म आपश्च म इत्याहैषा वा अन्नस्य योनिः सयोन्येवान्नमव रुन्धेऽर्द्धेन्द्राणि जुहोति देवता एवाव रुन्धे यथ् सर्वेषामर्द्धमिन्द्रः प्रति तस्मादिन्द्रो देवतानाम्भूयिष्ठभाक्तम इन्द्रमुत्तरमाहेन्द्रियमेवास्मिन्नुपरिष्टाद् दधाति यज्ञायुधानि जुहोति यज्ञो ॥ [३९] ॥ वै यज्ञायुधानि यज्ञमेवाव रुन्धेऽथो एतद्वै यज्ञस्य रूपꣳ रूपेणैव यज्ञमव रुन्धेऽवभृथश्च मे स्वगाकारश्च म इत्याह स्वगाकृत्या अग्निश्च मे घर्मश्च म इत्याहैतद् वै ब्रह्मवर्चसस्य रूपꣳ रूपेणैव ब्रह्मवर्चसमव रुन्ध ऋक् च मे साम च म इत्याहै ॥ [४०] ॥ तद् वै छन्दसाꣳ रूपꣳ रूपेणैव छन्दाꣳस्यव रुन्धे गर्भाश्च मे वथ्साश्च म इत्याहैतद् वै पशूनाꣳ रूपꣳ रूपेणैव पशूनव रुन्धे कल्पान् जुहोत्यक्लृप्तस्य क्लृप्त्यै युग्मदयुजे जुहोति मिथुनत्वायोत्तरावती भवतोऽभिक्रान्त्या एका च मे तिस्रश्च म इत्याह देवछन्दसव्वा एका च तिस्रश्च ॥ [४१] ॥ मनुष्यछन्दसञ्चतस्रश्चाष्टौ च देवछन्दसञ्चैव मनुष्यछन्दसञ्चाव रुन्ध आ त्रयस्त्रिꣳशतो जुहोति त्रयस्त्रिꣳशद् वै देवता देवता एवाव रुन्ध आऽष्टाचत्वारिꣳशतो जुहोत्यष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनव रुन्धे वाजश्च प्रसवश्चेति द्वादशञ्जुहोति द्वादश मासाः सँव्वथ्सरः सँव्वथ्सर एव प्रति तिष्ठति ॥ [४२] ॥

(वि वै यज्ञः साम च म इत्याह च तिस्र श्चैकान्नपञ्चाशच्च) ॥ ८ ॥

अग्निर् देवेभ्योऽपाक्रामद्भागधेयमिच्छमानस्तन्देवा अब्रुवन्नुप न आ वर्तस्व हव्यन्नो वहेति सोऽब्रवीद्वरव्वृणै मह्यमेव वाजप्रसवीयञ्जुहवन्निति तस्मादग्नये वाजप्रसवीयञ्जुह्वति यद्वाजप्रसवी-

यञ्जुहोत्यग्निमेव तद्भागधेयेन समर्द्धयत्यथो अभिषेक एवास्य स चतुर्दशभिर् जुहोति सप्त ग्राम्या ओषधयः सप्त ॥ [४३] ॥ ऽऽरण्या उभयीषामवरुद्ध्या अन्नस्यान्नस्य जुहोत्यन्नस्यान्नस्याव-रुद्ध्या औदुंबरेण स्रुवेण जुहोत्यूर्ग् वा उदुंबर ऊर्गन्नमूर्जैवास्मा ऊर्जमन्नमव रुन्धेऽग्निर् वै देवा-नामभिषिक्तोऽग्निचिन्मनुष्याणान्तस्मादग्निचिद्वर्षति न धावेदवरुद्धङ्ँ ह्यस्यान्नमन्नमिव खलु वै वर्षं यद्धावेदन्नाद्याद्धवेदुपावर्तेतान्नाद्यमेवाभ्यु ॥ [४४] ॥ पावर्तते नक्तोषासेति कृष्णायै श्वेतवथ्सायै पयसा जुहोत्यह्नैवास्मै रात्रिम्प्र दापयति रात्रियाऽहरहोरात्रे एवास्मै प्रत्ते काम-मन्नाद्यन्दुहाते राष्ट्रभृतो जुहोति राष्ट्रमेवाव रुन्धे षड्भिर् जुहोति षड् वा ऋतव ऋतुष्वेव प्रति तिष्ठति भुवनस्य पत इति रथमुखे पञ्चाऽऽहुतीर् जुहोति वज्रो वै रथो वज्रेणैव दिशो ॥ [४५] ॥ ऽभि जयत्यग्निचितꣳ ह वा अमुष्मिँल्लोके वातोऽभि पवते वातनामानि जुहोत्यभ्येवैनममुष्मि-ँल्लोके वातः पवते त्रीणि जुहोति त्रय इमे लोका एभ्य एव लोकेभ्यो वातमव रुन्धे समुद्रोऽसि नभस्वानित्याहैतद् व वातस्य रूपꣳ रूपेणैव वातमव रुन्धेऽञ्जलिना जुहोति न ह्येतेषामन्यथा ऽऽहुतिरवकल्पते ॥ [४६] ॥

(ओषधयः सप्ता भि दिशो ऽन्यथा द्वे च) ॥ ९ ॥

सुवर्गाय वै लोकाय देवरथो युज्यते यत्राकूताय मनुष्यरथ एष खलु वै देवरथो यदग्निर-ग्निर्य्युनज्मि शवसा घृतेनेत्याह युनक्त्येवैनꣳ स एनय्युँक्तः सुवर्गँल्लोकमभि वहति यथ् सर्वाभिः पञ्चभिर् युञ्ज्याद्युक्तोऽस्याऽग्निः प्रच्युतः स्यादप्रतिष्ठिता आहुतयः स्युरप्रतिष्ठिताः स्तोमा अप्र-तिष्ठितान्युक्थानि तिसृभिः प्रातस्सवनेऽभि मृशति त्रिवृ ॥ [४७] ॥ द्वा अग्निर् यावानेवाग्नि स्तय्युँनक्ति यथाऽनसि युक्त आधीयत एवमेव तत् प्रत्याहुतय स्तिष्ठन्ति प्रति स्तोमाः प्रत्यु-क्थानि यज्ञायज्ञियस्य स्तोत्रे द्वाभ्यामभि मृशत्येतावान्वै यज्ञो यावानग्निष्टोमो भूमा त्वा अस्यात ऊद्र्ध्वः क्रियते यावानेव यज्ञस्तमन्ततोऽन्वारोहति द्वाभ्याम्प्रतिष्ठित्या एकयाऽप्रस्तुतम्भव-त्यथा ॥ [४८] ॥ भि मृशत्युपैनमुत्तरो यज्ञो नमत्यथो सन्तत्यै प्र वा एषोऽस्मा ल्लोकाच्च्यवते योऽग्निञ्चिनुते न वा एतस्यानिष्टक आहुतिरव कल्पते याँ्वा एषोऽनिष्टक आहुतिञ्जुहोति स्रवति वै सा ताङ्ँ स्रवन्तीय्यँज्ञोऽनु परा भवति यज्ञय्यँजमानो यत् पुनश्चितिञ्चिनुत आहुतीनाम्प्रति-

ष्ठित्यै प्रत्याहुतय स्तिष्ठन्ति ॥ [४९] ॥ न यज्ञः पराभवति न यजमानोऽष्टावुप दधात्यष्टाक्षरा गायत्री गायत्रेणैवैनञ्छन्दसा चिनुते यदेकादश त्रैष्टुभेन यद् द्वादश जागतेन छन्दोभिरेवैनञ्चिनुते नपात्को वै नामैषोऽग्निर् यत् पुनश्चितिर् य एवव्विँद्वान् पुनश्चितिञ्चिनुत आ तृतीयात् पुरुषाद-न्नमत्ति यथा वै पुनराधेय एवं पुनश्चितिर् योऽग्न्याधेयेन न ॥ [५०] ॥ दृध्नोति स पुनराधेयमा धत्ते योऽग्निञ्चित्वा न दृध्नोति स पुनश्चितिञ्चिनुते यत् पुनश्चितिञ्चिनुत ऋद्ध्या अथो खल्वाहुर् न चेतव्येति रुद्रो वा एष यदग्निर् यथा व्याघ्रꣳ सुप्तम्बोधयति तादृगेव तदथो खल्वाहुश्चेतव्येति यथा वसीयाꣳसम्भागधेयेन बोधयति तादृगेव तन्मनुरग्निमचिनुत तेन नाऽऽर्ध्नोत् स एताम्पु-नश्चितिमपश्यत् तामचिनुत तया वै स आर्ध्नोद्यत् पुनश्चितिञ्चिनुत ऋद्ध्यै ॥ [५१] ॥

(त्रिवृ दध तिष्ठ न्त्यग्न्याधेयेन ना चिनुत सप्तदश च) ॥ १० ॥

छन्दश्चितञ्चिन्वीत पशुकामः पशवो वै छन्दाꣳसि पशुमानेव भवति श्येनचितञ्चिन्वीत सुव-र्गकामः श्येनो वै वयसाम्पतिष्ठः श्येन एव भूत्वा सुवर्गꣳल्लोकम्पतति कङ्कचितञ्चिन्वीत यः कामयेत शीर्षण्वानमुष्मिꣳल्लोके स्यामिति शीर्षण्वानेवामुष्मिꣳल्लोके भवत्यलजचितञ्चिन्वीत चतुस्सीतम्प्रतिष्ठाकाम श्चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठति प्रौगचितञ्चिन्वीत भ्रातृव्यवान् प्रै ॥ [५२] ॥ व भ्रातृव्यान् नुदत उभयतःप्रौगञ्चिन्वीतयः कामयेत प्र जातान् भ्रातृव्यान् नुदेय प्रति जनिष्यमाणानिति प्रैव जातान् भ्रातृव्यान् नुदते प्रति जनिष्यमाणान् रथचक्रचित-ञ्चिन्वीत भ्रातृव्यवान्वज्रो वै रथो वज्रमेव भ्रातृव्येभ्यः प्रहरति द्रोणचितञ्चिन्वीतान्नकामो द्रोणे वा अन्नम्भ्रियते सयोन्येवान्नमव रुन्धे समूह्यञ्चिन्वीत पशुकामः पशुमानेव भवति ॥ [५३] ॥ परिचाय्यञ्चिन्वीत ग्रामकामो ग्राम्येव भवति श्मशानचितञ्चिन्वीत यः कामयेत पितृलोक ऋध्नुयामिति पितृलोक एवर्ध्नोति विश्वामित्रजमदग्नी वसिष्ठेनाऽस्पर्द्धेताꣳ स एता जमदग्निर् विहव्या अपश्यत् ता उपाधत्त ताभिर् वै स वसिष्ठस्येन्द्रियव्वीँर्यमवृङ्क्त यद्विहव्या उपदधाती-न्द्रियमेव ताभिर् वीर्यय्यँजमानो भ्रातृव्यस्य वृङ्क्ते होतुर् धिष्णिय उप दधाति यजमानायत-नव्वै ॥ [५४] ॥ होता स्व एवास्मा आयतन इन्द्रियव्वीँर्यमव रुन्धे द्वादशोप दधाति द्वाद-शाक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनव रुन्धेऽष्टावष्टावन्येषु धिष्णियेषूप दधा-

त्यष्टाशफाः पशवः पशूनेवाव रुन्धे षण् मांर्जालीये षड् वा ऋतव ऋतवः खलु वै देवाः पितर ऋतूनेव देवान् पितृन् प्रीणाति ॥ [५५] ॥

(प्र भवति यजमानायतनँव्वा अष्टाचत्वारिꣳशच्च) ॥ ११ ॥

पवस्व वाजसातय इत्यनुष्टुक् प्रतिपद् भवति तिस्रोऽनुष्टुभ श्चतस्रो गायत्रियो यत् तिस्रोऽनु-
ष्टुभ स्तस्मादश्वस्त्रिभिस्तिष्ठꣳ स्तिष्ठति यच्चतस्रो गायत्रिय स्तस्माथ् सर्वाꣳ श्चतुरः पदः प्रति-
दधत् पलायते परमा वा एषा छन्दसाँय्यदनुष्टुक् परमश्चतुष्टोमः स्तोमानाम्परमस्त्रिरात्रो यज्ञा-
नाम्परमोऽश्वः पशूनाम्परमेणैवैनंपरमताङ्गमयत्येकविꣳशमहर् भवति ॥ [५६] ॥ यस्मिन्नश्व
आलभ्यते द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविꣳश एष प्रजापतिः प्राजा-
पत्योऽश्वस्तमेव साक्षादृध्नोति शक्वरयः पृष्ठम्भवन्त्यन्यदन्यच्छन्दोऽन्येन्ये वा एते पशव आ
लभ्यन्त उतेव ग्राम्या उतेवाऽऽ*रण्या यच्छक्वरयः पृष्ठम्भवन्त्यश्वस्य सर्वत्वाय पार्थुरश्मम्ब्रह्म-
सामम्भवति रश्मिना वा अश्वो ॥ [५७] ॥ यत ईश्वरो वा अश्वोऽयतोऽप्रतिष्ठितः पराम्परावत-
ङ्गन्तोर् यत् पार्थुरश्मम्ब्रह्मसामं भवत्यश्वस्य यत्यै धृत्यै संकृत्यच्छावाकसामम्भवत्युथ्सन्नयज्ञो
वा एष यदश्वमेधः क स्तद्वेदेत्याहुर् यदि सर्वो वा क्रियते न वा सर्व इति यथ् संकृत्यच्छा-
वाकसामम्भवत्यश्वस्य सर्वत्वाय पर्याप्त्या अनन्तरायायसर्वस्तोमोऽतिरात्र उत्तममहर् भवति
सर्वस्याऽऽप्त्यै सर्वस्य जित्यै सर्वमेव तेनाऽऽप्नोति सर्वञ्जयति ॥ [५८] ॥

(अहर्भवतिवा अश्वो ऽहर् भवति दश च) ॥ १२ ॥

समाप्ति कोर्वैः

(देवासुरास्तेन तव्यां रुद्रो ऽश्मं न्नृषदे व डुदंनं प्राचीमिति वसोर्द्धारा मग्निर् देवेभ्यः सुवर्गाय यत्राकूताय छन्दश्चितं पवस्व द्वादश)
(देवासुरा अजायां वै ग्रुमुष्टिः प्रथमो देवयतामे तद्वै छन्दसा मृद्ध्नो त्यष्टौ पञ्चाशत)
(देवासुराः सर्वञ्जयति)

॥ हरिः ॐ ॥

पञ्चमकाण्डे चतुर्थः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
१२	५८

ॐ